संस्कृत

-३-८-२२३

स्तोत्र

सारस्वती - स्तोत्र - दशश्लोकी

६९८। स्तो. २३३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

१

श्रीगणेशायनमः॥ ऋषयऊचु॥ क
थंसारस्वतप्राप्तिः केनध्यानेनसुव्र
त॥ महासरस्वतीयेनतुष्टाभवतितद्वद १
आश्वलायनउवाच॥ सदासकलरोग
घ्नंसदासर्वसमृद्धिदं॥ सर्वपापक्षय
करंसर्वाभीष्टप्रदायकं॥ २ शृण्वंतु ऋ
षयः सर्वेगुह्याद्गुह्यतरंमहत्॥ दश
श्लोकीस्तुतिविख्यानंवदामिध्यानपूर्व
कं ३ अंकुशंचाक्षसूत्रंचपाशपुस्तक
धारिणी॥ मुक्ताहारसमायुक्तांदेवीं

१

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(1A)

ध्यायेच्चतुर्भुजां ४ स्मितेन दर्पणाभेन
वस्त्रेण परिभूषितां ॥ सुस्तनी वेदम
ध्यस्थां चंद्रार्धकृतशेखरां ५ जटा
कलापसंयुक्तां पूर्णचंद्रनिभाननां ॥
त्रिलोचनां महादेवीं स्वर्णनूपुरधा
रिणीं ६ कटके स्वर्णरत्नाद्यैर्मुक्ता
वलयशोभितां ॥ कंबुकेशी सुनाम्नो
क्षी सर्वाभरणभूषितां ७ केयूरैर्मे
खलाद्यैश्च द्योतयंती जगत्त्रयीं ॥ श
ब्दब्रह्ममयीं ध्यायेध्यानकामस्सदा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

2 हितः ८ अस्य श्रीदत्राश्लोकीस्तोत्रमं
त्रस्य। आश्वलायन ऋषिः। अनुष्टुप्छं
दः। श्रीवागीश्वरी देवता। यद्वागिति बी
जं। देवीं वाचमजनयंतेति शक्तिः। प्रणो
देवीति कीलकं। परब्रह्माधिदैवत्यं म
म वाक्सिध्यर्थं श्रीशारदाप्रीत्यर्थं ज
पे विनियोगः। परब्रह्मात्मिका देवी
भुक्तिमुक्तिफलप्रदां॥ प्रणम्य स्तो
मि तामेव ज्ञानसिंधूं सरस्वतीं १० ये
वेदांतोक्ततत्त्वैकस्वरूपा परमार्थतः॥ 2

(2A)

नामरूपात्मना व्यक्ता सा मां पातु सरस्व
ती ११ यां सांगोपांग वेदेषु चतुर्ष्वेकेव गी
यते ॥ अद्वैता ब्रह्मणः शक्तिः सा० १२ या प्र
त्यग्दृष्टिभिर्देवैर्व्यज्यमानानुभूयते ॥
व्यापिनी ज्ञप्तिरूपैका सा० १३ यां विदि
त्वाखिलं बंधं निर्मथ्याखिल वर्त्मना ॥
योगी याति परं स्थानं सा मां पातु स
रस्वती ॥ १४ ॥ या वर्णपदवाक्यार्थस्व
रूपेण प्रवर्तते ॥ अनादिनिधनानंता
सा० १५ अध्यात्ममधिदैवं च देवानां

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

३

(3)

सम्यगाभ्वरी॥ प्रत्यगास्तेयदंती या सा॰ १६
अंतर्याम्यात्मना विश्वं त्रैलोक्यं यानुतिष्ठति॥
रुद्रादिरूपसंस्थानं सा॰ १७ नामजात्यादि
भिर्भेदैरष्टधा या विकल्पिता॥ निर्विकल्पा
त्मिका चैका सा॰ १८ नामरूपादिकं सर्वं य
स्या माविन्त्ता वे पुनः॥ अध्यायंति ब्रह्मणो रूपं
सामोपानु सरस्वती १९ व्यक्ताव्यक्तगिरः
सर्वे देवाद्यां माहरंति यां॥ सर्वकामदुघा
धेनुः सा॰ २० यः कांचित्वं निरातंकं भुक्तिं मु
क्तिं च वांछति॥ सोभ्यर्च्यैतां दृढस्मृलोक्या
रास्ता स्तोनु सरस्वती २१ तस्यैवं स्तुवतो

३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(3A)

नित्यंसमभ्यचसरस्वतीं ॥ भक्तिःश्रद्धा
भियुक्तस्य षण्मासात्प्रत्ययोभवेत् ॥२२॥
ततःप्रवर्ततेवाणी स्वेच्छयाललिताक्षरा ।
गद्यपद्यात्मकैःशब्दैःप्रमेयैश्च विचसि
तैः २३ अश्रुतंबुध्यति यंथंप्रायःसार
स्वतःकविः ॥ श्रुतंचधारयेदाशुस्वल
द्धीस्फूटवाग्भवेत् २४ विख्यातःस
र्वलोकेषु वाग्मीभवति पूजितः ॥ अ
जेयः प्रतिपक्षाणां स्वयंजेताचजाय
ते २५ स्वेच्छयाचेद्वाहोर्वा विवादिप्र
स्तुनेसति ॥ अहंवाचस्पतिर्वि छुः शि

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(५)

थो वास्मीतिभावयेत् २६ एवंभावय
तानेनब्रह्मस्यातिरपिस्वयं ॥ नत्राक्रो
तिसमंवक्तुं नरेषु नेषु का कथा २७ नको
पनस्त्रियन्निंदे न देवानपिचद्विजान् ॥
अनार्यैर्नाभिभाषेत सर्वत्रैव क्षमी भ
वेत् २८ सर्वत्रैव प्रियं ब्रूयाद्याद्दिच्छेच्छु
भमात्मनः ॥ श्लोकैरेव तिरस्कुर्याद्द्वि
षंतं प्रतिवादिनं २९ यद्वागिति तु चैनं
वदेद्यो वोर्चति सुव्रत ॥ तस्य नासंस्कृता
वाणीमुखादुच्चरते क्वचित् ३० यत्कुं
देंदुतारहारधवला याभुभ्रवस्त्रावृ

(9A)

तायावीणावरदंडमंडितकरायाश्वेतप
द्मासना ॥ याब्रह्माच्युतशंकरप्रभृति
भिर्देवैः सदावंदिता सामांपातु सरस्व
तीभगवती निःशेषजाड्यापहा ३१ दो
र्भिर्युक्ताचतुर्भिः स्फटिकमणिमयीम
क्षमालांदधाना हस्तेनैकेनपद्मं सित
मपिचशुकंपुस्तकंचापरेण ॥ यासाकुं
देंदुशंखस्फटिकमणिनिभा भासमा
नासमाना सामेवाग्देवतेयंनिवसतुवद
ने सर्वदासुप्रसन्ना ३२ सरस्वतीनम
स्तुभ्यंवरदेकामरूपिणी ॥ विद्यारंभं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5)

५ करिष्यामि सिद्धिर्भवति सायदा ३३
इतिश्रीआश्वलायन विरचितंश्रीस
रस्वतीदशश्लोकी स्तोत्रं ॥आषाढ
स्या सितेपक्षे आर्द्रायां दक्षिणायने॥
एकादश्यां तु [illegible] मोदेह्य लिख
द्व रिः॥१॥श्री सरस्वती प्रीयतां॥
श्रीः॥ छ ॥ छ ॥ छ॥ छ॥ छ॥
श्रीसदाशिवार्पणमस्तु॥ छ छ छ
श्रीहरिहरं बार्पणमस्तु श्रीहरबार्पणमस्तु॥ छ ५

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com